CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
33·P·13
Coll. No. 170

Title Tarkasangraha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 170 Subject: Nyāya

Title: Tarkasaṃgraha.

Author: Anna Bhaṭṭa Scribe: Jīvana.

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.7" x 3.8" Extent: 8 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: Complete

तर्क॰ सं॰ १ श्रीगणेशाय नमः ॥ निधाय हृदि विश्वेशं विधाय गुरुवंदनं ॥ बालानां सुखबोधाय क्रियते तर्कसंग्रहः ॥ १ ॥ द्रव्यगुणकर्म
सामान्यविशेषसमवायाभावाख्याः सप्तैव पदार्थाः ॥ तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव
रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुधिसुखदुःखेच्छाद्वे
षप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः ॥ उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचकर्माणि ॥ परम
परं चेति द्विविधं सामान्यं ॥ नित्यद्रव्यवृत्तयो विशेषास्त्वनंता एव ॥ समवायस्त्वेक एव ॥ अभावश्चतुर्विधः ॥ प्रागभावः
प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याभावश्चेति ॥ तत्र गंधवती पृथ्वी ॥ सा द्विधा ॥ नित्याऽनित्या च ॥ नित्या परमाणु
रूपा ॥ अनित्या कार्यरूपा ॥ पुनस्त्रिधा ॥ शरीरेंद्रियविषयभेदात् ॥ शरीरमस्मदादीनां ॥ इंद्रियं गंधग्राहकं घ्राणं
नासाग्रवर्ति ॥ विषयो मृत्पाषाणादिः ॥ शीतस्पर्शवत्य आपः ॥ ता द्विधा ॥ नित्या अनित्याश्च ॥ नित्याः परमाणुरू
पाः ॥ अनित्याः कार्यरूपाः ॥ पुनस्त्रिधा ॥ शरीरेंद्रियविषयभेदात् ॥ शरीरं वरुणलोके ॥ इंद्रियं रसग्राहकं रसनं

जिह्वाग्रवर्ति ॥ विषयः सरित्समुद्रादिः ॥ उष्णस्पर्शवत्तेजः ॥ तद्द्विविधं ॥ नित्यमनित्यं च ॥ नित्यं परमाणुरूपं ॥ अनित्यं का
र्यरूपं ॥ पुनस्त्रिधा ॥ शरीरेंद्रियविषयभेदात् ॥ शरीरमादित्यलोके ॥ इंद्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति ॥ विषय
श्चतुर्विधः ॥ भौमदिव्योदर्याकरजभेदात् ॥ भौमं वह्न्यादि ॥ अबिंधनं दिव्यं विद्युदादि ॥ भुक्तस्य परिणामहेतु
रौदर्यं ॥ आकरजं सुवर्णादि ॥ रूपरहितस्पर्शवान् वायुः ॥ स द्विविधः ॥ नित्योऽनित्यश्च ॥ नित्यः परमाणुरूपः ॥ अनित्यः
कार्यरूपः ॥ पुनस्त्रिविधः ॥ शरीरेंद्रियविषयभेदात् ॥ शरीरं वायुलोके ॥ इंद्रियं स्पर्शग्राहकं त्वक् सर्वशरीरव्यापि ॥ विषयो वृक्षा
दिकंपनहेतुः ॥ शरीरांतःसंचारी वायुः प्राणः ॥ स एकोऽपि उपाधिभेदात् प्राणापानादिसंज्ञां लभते ॥ शब्दगुणमा
काशं ॥ तच्चैकं विभु नित्यं च ॥ अतीतादिव्यवहारहेतुः कालः ॥ स चैको नित्यो विभुश्च ॥ प्राच्यादिव्यवहारहेतुर्दिक् ॥
सा चैका नित्या विभ्वी च ॥ ज्ञानाधिकरणमात्मा ॥ स द्विविधः ॥ परमात्मा जीवात्मा चेति ॥ तत्रेश्वरः सर्वज्ञः परमात्मा
एक एव ॥ जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ॥ सुखाद्युपलब्धिसाधनमिंद्रियं मनः ॥ तच्च प्रत्यात्मनियत

तर्क० सं०
२

तसादनंतं परमाणुरूपं नित्यं च। चक्षुर्मात्रग्राह्यो गुणो रूपं। तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदा
त्सप्तविधं। पृथ्वीजलतेजोवृत्ति। पृथ्व्यां सप्तविधं। अभास्वरं शुक्लं जले। भास्वरं शुक्लं तेजसि। रसनग्राह्यो गुणो रसः।
स च मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः। पृथ्वीजलवृत्तिः। तत्र पृथ्व्यां षड्विधः। जले मधुर एव। घ्राण
ग्राह्यो गुणो गंधः। स द्विविधः। सुरभिरसुरभिश्च। पृथ्वीमात्रवृत्तिः। त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिवि
धः। शीतोष्णानुष्णाशीतभेदात्। पृथ्व्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथ्वीवाय्वोः।
रूपादिचतुष्टयं पृथ्व्यां पाकजमनित्यं च। अन्यत्र पाकजं नित्यमनित्यं च। नित्यगतं नित्यं। अनित्यगतमनित्यं।
एकत्वादिव्यवहारहेतुः संख्या। नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यंतं। एकत्वं नित्यगतं नित्यमनित्यगतमनित्यं। शिवः
द्वित्वादिकं तु सर्वत्रानित्यमेव। मानव्यवहारासाधारणं कारणं परिमाणं। सर्वद्रव्यवृत्ति। तच्चतुर्विधं। २
अणुमहद्दीर्घह्रस्वं चेति। पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं। सर्वद्रव्यवृत्ति। संयुक्तव्यवहारासाधारण

श्रेष्ठे कालकृतं परत्वं। २

हेतुः संयोगः। सर्वद्रव्यवृत्तिः। संयोगनाशको गुणो विभागः। सर्वद्रव्यवृत्तिः। परापरव्यवहारासाधारणे कारणे परत्वा
परत्वे। ते द्विधे। दिक्कृते कालकृते च। दूरस्थे दिक्कृतं परत्वं। समीपस्थे दिक्कृतमपरत्वं। कनिष्ठे कालकृतमपरत्वं। आ
द्यपतनासमवायिकारणं गुरुत्वं। पृथ्वीजलवृत्तिः। आद्यस्यंदनासमवायिकारणं द्रवत्वं। पृथ्व्यप्तेजोवृत्ति।
तद्विविधं। सांसिद्धिकं नैमित्तिकं चेति। सांसिद्धिकं जले। नैमित्तिकं पृथ्वीतेजसोः। पृथ्व्यां घृतादावग्निसं
योगजं द्रवत्वं। तेजसि सुवर्णादौ। चूर्णादिपिंडीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः। श्रोत्रग्राह्यो गुणः श
ब्दः। आकाशमात्रवृत्तिः। स द्विविधः। ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ। वर्णात्मकः संस्कृ
२ तभाषणरूपः। सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं। सा द्विविधा। स्मृतिरनुभवश्च। संस्कारजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञा
नमनुभवः। स द्विविधः। यथार्थोऽयथार्थश्च। तद्वति तत्प्रकारकानुभवो यथार्थः। यथा घटे घटत्वादिज्ञानं। सैव
प्रमेत्युच्यते। तदभाववति तत्प्रकारकानुभवोऽयथार्थः। यथा शुक्तौ इदं रजतमिति। यथार्थानुभवश्चतुर्विधः। प्रत्य

वि १

तर्क. स. ज्ञानुमितिरुपमितिः शाब्दश्चेति । तत्करणमपि चतुर्धा । प्रत्यक्षानुमानोपमानशब्दभेदात् । असाधारणं कार
णं करणं । कार्यनियतपूर्ववृत्ति कारणं । कार्यं प्रागभावप्रतियोगि । कारणं त्रिविधं । समवाय्यसमवायिनिमि
त्तभेदात् । यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं । यथा तंतवः पटस्य । पटश्च स्वगतरूपादेः । कार्येण का
रणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति कारणं तदसमवायिकारणं । यथा तंतुसंयोगः पटस्य । तंतुरूपं पटगतरू
पस्य । तदुभयभिन्नं कारणं निमित्तकारणं । यथा तुरीवेमादिकं पटस्य । तदेतत्त्रिविधकारणमध्ये यदसाधा
रणं कारणं तदेव करणं । प्रत्यक्षज्ञानकरणं प्रत्यक्षं । इंद्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं । तद्द्विविधं ।
निर्विकल्पकं सविकल्पकं च । निष्प्रकारकं निर्विकल्पकं । सप्रकारकं सविकल्पकं । यथा डित्थोयमिति । प्रत्य
क्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः षड्विधः । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः
समवेतसमवायो विशेषणता चा । चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः । घटरूपप्रत्यक्षजनने सं

युक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूप~~समवेतं तत्र रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः~~
स्य समवायात् । रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूप
त्वस्य समवायात् । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याका
शगुणत्वात् गुणगुणिनोश्च समवायात् । श्रोत्रेण शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रस
मवेते शब्दे शब्दत्वस्य समवायात् । अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद्भूतलमित्य
त्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् । एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं । तत्करणमिंद्रियं । तस्मादिं
द्रियं प्रत्यक्षप्रमाणमिति सिद्धं ॥ इति प्रत्यक्षखंडः ॥ ॥ अनुमितिकरणमनुमानं । परामर्शजन्यं ज्ञान
मनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा वह्निव्याप्यधूमवानयं पर्वत इति । तज्जन्यं पर्वतो
वह्निमानिति ज्ञानमनुमितिः । यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः । व्याप्यस्य पर्वतादि

तर्क॰ सं॰
४

स्वार्थो वैश्र॰ हुंमितिलिङ्ग॰ — न॰ जीवन

लिंगपरामर्शो॥ अनुमानं द्विविधं स्वार्थं परार्थं च स्वार्थं स्वानुमितिहेतुः॥ तथाहि॥ स्वयमेव भूयो दर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्वते धूमं पश्यन्व्याप्तिं स्मरति यत्र धूमस्तत्राग्निरिति। तदनंतरं [redacted] वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिंगपरामर्श इत्युच्यते। तस्मात्पर्वतो वह्निमानिति अनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानं। यत्तु स्वयमेव धूमादग्निमनुमाय परं प्रति बोधयितुं पंचावयववाक्यं प्रयुंक्ते। तत्परार्थानुमानं। यथा पर्वतो वह्निमान् धूमवत्त्वात् यो यो धूमवान्स सोऽग्निमान् यथा महानसं तथा चायं तस्मात्तथेति॥ अनेन प्रतिपादिताल्लिंगात्परोऽप्यग्निं प्रतिपद्यते। प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पंचावयवाः पर्वतोऽग्निमानिति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान् इत्युदाहरणं। तथा चायमित्युपनयः। तस्मात्तथेति निगमनं। स्वार्थानुमितिपरार्थानुमित्योर्लिंगपरामर्श एव करणं। तस्माल्लिंगपरामर्शोऽनुमानं॥

लिंग॰
४

लिंगं त्रिविधं अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति॥ अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वं। यत्र धूमस्तत्राग्निरिति यथा व्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्तीति व्यतिरेकव्याप्तिः। यथा महानसमहाह्रदौ दृष्टांतौ। अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वात् पटवदिति॥ अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्तीति। सर्वस्याभिधेयत्वात् प्रमेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा पृथ्वी इतरेभ्यो भिद्यते गंधवत्त्वात् यदितरेभ्यो न भिद्यते न तद्गंधवत् यथा जलं न चेयं तथा। तस्मान्न तथेति। अत्र यद्गंधवत्तदितरभिन्नमित्यन्वयदृष्टांतो नास्ति। पृथ्वीमात्रस्य पक्षत्वात्॥ संदिग्धसाध्यवान्पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः॥ निश्चितसाध्यवान्सपक्षः॥ निश्चितसाध्याभाववान्

हेत्वाभासाः

विपक्षः। यथा तत्रैव महाह्रदः॥ सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधि[illegible]ताः पंच हेत्वाभासाः॥ सव्यभिचारोऽनैकांतिकः॥ स त्रिधा। साधारणासाधारणानुपसंहारिभेदात्। तत्र साध्याभाववद्वृत्तिः

तर्क.टी. ५ विपक्षे नं.जी.व.द

वद्वृत्तिः साधारणोनैकांतिकः।। यथा पर्वतो वह्निमान् प्रमेयत्वादिति। प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमा
नत्वात्। सर्वसपक्षव्यावृत्तोऽसाधारणः।। यथा शब्दो नित्यः शब्दत्वात्। शब्दत्वं सर्वेभ्यो नित्येभ्यो व्यावृत्तं। श अनित्ये
ब्दमात्रवृत्तिः।। अन्वयव्यतिरेकदृष्टांतरहितोऽनुपसंहारी।। यथा सर्वमनित्यं प्रमेयत्वादिति।। अत्र सर्वस्या
पि पक्षत्वात् दृष्टांतो नास्ति।। साध्याभावव्याप्तो विरुद्धः।। यथा शब्दो नित्यः कार्यत्वादिति।। कार्यत्वं नित्यत्वा
भावेनानित्यत्वेन व्याप्तं।। यस्य साध्याभावसाधकं हेत्वंतरं विद्यते स सत्प्रतिपक्षः।। यथा शब्दो नित्यः श्रा
वणत्वात् शब्दत्ववत्। शब्दोऽनित्यः कार्यत्वात् घटवत्।। असिद्धस्त्रिविधः।। आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वा ई.रा
सिद्धश्चेति।। आश्रयासिद्धो यथा।। गगनारविंदं सुरभि[illegible]त्वात्। सरोजारविंदवत्।। अत्र गगनारवि अरविंद शिवः
न्दमाश्रयः स तु नास्त्येव।। स्वरूपासिद्धो यथा।। शब्दो गुणश्चाक्षुषत्वादिति।। अत्र चाक्षुषत्वं शब्दे नास्तीति ५
शब्दस्य श्रावणत्वात्।। सोपाधिको व्याप्यत्वासिद्धः।। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः।। य
यं उपाधिः साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यव्यापकत्वं। साधनवन्निष्ठात्यंता
भावप्रतियोगित्वं साधनाव्यापकत्वं।। पर्वतो धूमवान् वह्निमत्वादित्यत्र आर्द्रेंधनसंयोग १
गगनारविंदे गगनीयत्वं पक्षतावच्छेदकाभावः

त्र धूमस्तत्रार्द्रेंधन[illegible]संयोग इति साध्यव्यापकता।। यत्र वह्नि[illegible]तत्र आर्द्रें
धनसंयोगो नास्ति।। अयोगोलके आर्द्रेंधनाभावात्।। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रेंधनसं
योग उपाधिः।। सोपाधिकत्वाद्वह्निमत्वं व्याप्यत्वासिद्धं।। यस्य साध्याभावः प्रमाणे निश्चितः स बाधितः।। यथा व णांतरे
ह्निरनुष्णो द्रव्यत्वादिति।। अत्रानुष्णत्वं साध्यं तदभावो उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यत इति बाधितत्वं।।
मनु व्याख्यातं[illegible]मानं।। उपमितिकरणमुपमानं।। संज्ञासंज्ञिसंबंधज्ञानमुपमितिः।। तत्करणं सादृश्यज्ञानं।। तथाहि
कश्चिद्गवयशब्दार्थमजानन् कुतश्चित्पुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं
पश्यति।। तदनंतरमयं गवयपदवाच्य इत्युपमितिरुत्पद्यते।। ।। व्याख्यातमुपमानं।। आप्तवाक्यं शब्दः।। आ
प्तस्तु यथार्थवक्ता।। वाक्यं पदसमूहः।। यथा गामानयेति।। शक्तं पदं।। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः
शक्तिः।। आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः।। पदस्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्व

निगामानयेत्यादि ३

तर्क॰ टी॰ ६ आकांक्षा। अर्थाबाधो योग्यता। पदानामविलंबोच्चारणं सन्निधिः। आकांक्षारहितं वाक्यं न प्रमाणं। यथा गौर न॰ ॐ वि॰
श्वः पुरुषो हस्तीति न प्रमाणं। आकांक्षाविरहात्। अग्निना सिंचेदिति न प्रमाणं। योग्यताविरहात्। प्रहरे प्रहरे
असहोच्चारितानि पदानि न प्रमाणं। सान्निध्याभावात्। वाक्यं द्विविधं। वैदिकं लौकिकं च। वैदिकमीश्वरोक्त
त्वात्सर्वमेव प्रमाणं। लौकिकं त्वाप्तोक्तं प्रमाणं। अन्यदप्रमाणं। वाक्यार्थज्ञानं शाब्दज्ञानं। तत्करणं शब्दः॥
यथार्थानुभवो निरूपितः। अयथार्थानुभवस्त्रिविधः। संशयविपर्ययतर्कभेदात्। एकस्मिन्धर्मिणि विरुद्ध
नानाधर्मवैशिष्ट्यज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति। मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमि शिवः ६
ति। व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात्तदा धूमोऽपि न स्यादिति। स्मृतिरपि यथा
र्था अयथार्था च। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था। सर्वेषामनुकूलवेदनीयं सुखं। सर्वेषां प्रतिकू
लवेदनीयं दुःखं। इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः। विहितकर्मजन्यो धर्मः। अविहितकर्मजन्योऽधर्मः। बुध्या

दयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च। नित्या ईश्वरस्य। अनित्या जीवस्य। संस्कार
स्त्रिविधः। वेगो भावना स्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भाव
ना आत्ममात्रवृत्तिः। अन्यथाकृतस्य तदवस्थापादकः स्थितिस्थापकः। कटादिपृथ्वीवृत्तिः। चलनात्मकं कर्म।
ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं। अधोदेशसंयोगहेतुरपक्षेपणं। शरीरसन्निकृष्टसंयोगहेतुराकुंच
नं। शरीरविप्रकृष्टहेतुः प्रसारणं। अन्यत्सर्वं [illegible]। नित्यमेकमनेकानुगतं सामान्यं। द्रव्यगुणकर्मवृत्ति।
गमनं ५ परं सत्ता। अपरं द्रव्यत्वादि [illegible]। नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः। नित्यसंबंधः समवायः। अयुतसि
द्धवृत्तिः। ययोर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ। यथावयवावयविनौ गुणगुणिनौ क्रि
याक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अनादिः सांतः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य। सादिरनं
तः प्रध्वंसः। उत्पत्त्यनंतरं कार्यस्य। त्रैकालिकसंसर्गावच्छिन्नप्रतियो[illegible]ताकोऽत्यंताभावः। यथा भूतले
गि

घटो नास्ती।ति।तादात्म्यावछिन्नप्रतियोगिताकोन्योन्याभावः यथा घटः पटो नास्तीति।सर्वेषामपि पदार्थानां य
थायथमुक्तेष्वंतर्भावात्सप्तेव पदार्था इति प्रसिद्धं।काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।अन्नंभट्टे
न विदुषा रचितस्तर्कसंग्रहः।१।इति तर्कसंग्रहः समाप्तः॥ ॥पद्मरामस्यात्मजजीवनस्यायं लेखः॥

॥अलक्ष्ये लक्षणगमनमतिव्याप्तिः॥ यथा शृंगवत्वं गोरिति॥ लक्ष्यैकदेशे लक्षणस्यावर्तनम्
अव्याप्तिः॥ यथा कपिलत्वं गोरिति॥ लक्ष्ये क्वाप्यवर्तनम् असंभवः। यथा एकशफत्वं गोरिति